Purva Mimaansa | Refereed | Peer Reviewed
ISSN: 0976-0237 | Volume 12, Issue September 2021 | Impact Factor 4.765

# यादवाभ्युदयं काव्यरत्नम्

**V. BALAJI**
Assistant Professor, Department of Sanskrit
Dwaraka Doss Goverdhan Doss Vaishnav College, Arumbakkam (Chennai)

## शोधसार:

सहृदयहृदयाह्लादकरं काव्यमिति विदुषां शेमुषी वरीवर्ति। एवं शब्दार्थशरीरं काव्यमिति सर्वसम्मतलक्षणमप्यस्ति साहित्यवाङ्मये । तथाभूतस्य काव्यस्य विशेषलक्षणं मम्मटाचार्यैः स्वीय काव्यप्रकाशे इत्थं सन्निगद्यते –"तददोषौ सगुणौ शब्दार्थावनलङ्कृती पुनः क्वापि"इति । तथाभूतस्य सहृदयमनःप्रीतिदायकस्य काव्यस्य उत्तम-मध्यम-अधम भेदेन विभागः कृतः । यस्मिन् काव्ये व्यङ्ग्यार्थः वाच्यात् प्राधान्यं लभते तत्काव्यं ध्वनिकाव्यं, तदेवोत्तमकाव्यमिति विदुषां मनीषा । यत्र च व्यङ्ग्यस्यास्तित्वेपि तस्याप्राधान्यं, समप्रधानञ्च वर्तते तत्तु मध्यमाख्यं गुणीभूतमिति। यत्र व्यङ्ग्यार्थ एव नास्ति तदधममिति ध्वनिकारानुयायिभिः आलङ्कारैः विशेषविभागः कृतः ।

अपि च काव्यस्य सामान्यतया दृश्यं श्रव्यमिति द्विप्रकारतया विभागः कृतः । तत्र श्रव्यकाव्यं द्वेधा संविभक्तं महाकाव्यं, खण्डकाव्यमिति । तयोर्मध्ये देदीप्यमानस्य महाकाव्यस्य लक्षणं महाकवि दण्डिनेत्थं प्रत्यपादि –"सर्गबन्धो महाकाव्यम् उच्यते तस्य लक्षणम्" इति ।उक्तलक्षणोपेतानि रघुवंशादीनि महाकाव्यानि नैकानेकानि संस्कृतसाहित्यवाङ्मये संविराजन्ते । तेषु स्वामिनिगमान्तमहादेशिकैः समनुगृहीतमिदं भगवतो श्रीकृष्णस्य यदुवंशस्य वैशिष्ट्यप्रतिपादनपरं यादवाभ्युदयाभिधं चतुर्विंशतिसर्गात्मकं महाकाव्यं चकास्ति। यत्र स्वामिदेशिकः सहृदयहृदयाह्लादकरूपैः, महाकाव्यलक्षणोपेतैः पद्यैः च महाकाव्यमिदं सूत्राञ्चकार। काव्यस्यास्य वैशिष्ट्यं तस्य व्याख्याकारै अप्पयदीक्षिताचार्यैः इत्थं जोघुष्यते –"यदोर्वंशं नरश्श्रुत्वा सर्वपापैः प्रमुच्यते । यत्रावतीर्णं कृष्णाख्यं पूर्णं ब्रह्मनराकृति ।।" एवं " इत्थं विचिन्त्याः सर्वत्र भावास्सन्ति पदे पदे । कवितार्किकसिंहस्य काव्येषु ललितेष्वपि"इति ।

एवं "क्षेमदं काव्यरत्नम्" इति स्वामिदेशिकैः ग्रन्थस्यास्यान्ते सन्निगदितो वर्तते ।तदर्थं शोधपत्रेऽस्मिन्स्थालीपुलाकन्यायेन उत्तम-मध्यम-अधम भेदान्विताः, एवं काव्यलक्षणोपेताः, रत्नचिह्नाङ्किताः केचनश्लोकाः प्रतिपादिताः सन्ति ।

**उपोद्घातः**

शब्दार्थशरीरं काव्यमिति काव्यस्य सामान्य लक्षणं प्रोवाच। एवंकवेः कर्म काव्यमित्यपिनिगदितो वर्तते। एवम्भूतस्य तस्य सर्वप्रथमं निष्कृष्टतयापि लक्षणमवादीत्–

संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम्।।[1]

इति। एवं महर्षिकपिलेनापि इत्थं प्रादर्शि -

भावानुभूतिमद्वाक्यं रसवत् ध्वनिसङ्गतम्।
गुणालंकारसञ्जुष्टं काव्यं रम्यार्थद्योतकम्।।[2]

इत्यादिना इदं सुस्पष्टं ज्ञायते यत् गुणालंकारादि सहितं, रसोपेतं, ध्वनिजुष्टं, सौन्दर्यभूयिष्ठं च वाक्यं काव्यमिति। तदपि उत्तरत्र आचार्यमम्मटेन दृढीक्रियते–"तददोषौ सगुणौ शब्दार्थावनलङ्कृति पुनः क्वापि"[3] इति। एवमन्ये च बहवः कवयः बहुविधप्रकारेणास्य लक्षणं सन्निगदयाञ्चक्रुः। एवम्भूतं सहृदयहृदयाह्लादकरं हि काव्यं सामान्यतया द्विधा विभक्तं भवति, दृश्यं, श्रव्यमिति। तयोर्मध्ये श्रव्यकाव्यस्य विभागे महाकाव्यस्य उपस्थितिः भवति। तल्लक्षणमधिकृत्य कविप्रवरेण दण्डिना स्वीय काव्यादर्शे सर्गबन्धो महाकाव्यं.... इत्यादिना प्रत्यपादि। उक्तलक्षणोपेतानि काव्यानि अनेकानि सन्ति। आलङ्कारिकैःकाव्यस्य उत्तम-मध्यम-अवरभेदेन त्रिधा विभागः अकारि। तेषु यत्र वाच्यात् व्यङ्ग्यप्राधान्यं वरीवर्ति तत्काव्यं ध्वनिकाव्यमिति कारणात् तस्य उत्तमकाव्यमिति नाम चकार। यत्र व्यङ्ग्यार्थः अस्ति परन्तु तस्य वाच्येन गुणीकृते सति तर्हि तत्काव्यं मध्यमकाव्यमिति, एवं यत्र व्यङ्ग्यार्थ एव नास्ति, केवलं शब्दार्थालङ्काराणामेवाभिव्यक्तिः तत्काव्यमवरकाव्यमिति त्रिधा विभागः कृतः। इदानीम् उक्तविभागोपेतं स्वामिनिगमान्तमहादेशिकैः समनुगृहीतमिदं यादवाभ्युदयनामकं काव्यं चकास्ति। काव्येऽस्मिन् चतुर्विंशतिसर्गाः समुल्लसन्ति। तेषु सर्गेषु देदीप्यमानेषु श्लोकेषु द्वित्रान् उक्तविषयोपेतान् श्लोकान् स्थालीपुलाकन्यायेनात्र प्रदर्श्यते।......

**काव्यरत्नप्रकटनपराः श्लोकाः**

प्रथमसर्गे यदुवंशस्यौन्नत्यप्रकटनप्रकरणे श्लोकोऽसौ वरीवर्ति –

युक्तदण्डममित्राणां कृतान्तं समवर्तिनम्।
दक्षिणं लोकपालं तममन्यन्त दिवौकसः।।[4]

**तस्यार्थः**

दिवौकसः – देवाः, तं – यदुमहाराजं, अमन्यन्त – मेनिरे, कथम्भूतं तं मेनिरेत्याकाङ्क्षायां श्लोके विद्यमानानि द्वितीयान्तविशेषणपदानि संसूचयन्ति। युक्तदण्डं – अपराधोचितदण्डदमित्यर्थः। अमित्राणां – शत्रूणां, विनाशकारिणम्, एवं प्रजासु समवर्तनशीलम् पक्षपातादिकमतिरिच्य कार्यं करोतीत्यर्थः, दक्षिणराज्यशासने प्रावीण्ययुक्तम्, नरलोकपालमिति त्रिदशाः अमन्यन्त इति श्लोकार्थः। परन्तु तत्र दक्षिणं लोकपालमिति विशेषणपदप्रयोगः धर्मराजेऽपि सङ्गच्छते, तदुक्तममरकोषे –इन्द्रो वह्निः पितृपतिः नैरृतो वरुणो मरुत्। कुबेर ईशःपतयः



PURVA MIMAANSA

पूर्वादीनां दिशां क्रमात्।।[5] इति क्रमेण प्रत्येकस्याः दिशः नेतृत्वेन एकैकस्य देवस्य संसूचनात् दक्षिणाशायाः पतिः यम इति ज्ञायते, अतः अत्र श्लोके उपयुक्तंदक्षिणं लोकपालमिति पदं यमविषयकमेवेति मत्वा, यदि पुनरेकवारं श्लोकं दृश्यते चेत्, तत्र यानीतरविशेषणपादनि उपयुक्तानि तानि सर्वाणि तं द्योतयन्ति। तथाहि - धर्मराजोऽपि युक्तदण्डः अर्थात् दण्ड इति नाम्ना प्रसिद्धायुधोपेतः सः, तमित्यर्थः। ततः अमित्राणां कृतान्तः – शत्रूणां प्राणघातकः, एवं अमरकोषप्रमाणेन सोऽपि दक्षिणकाष्ठायाः अधिपतिः इत्यर्थः। तत्रोपयुक्तविशेषणपादानामर्थद्वयप्रतीतेः श्लेषालङ्कारः वाच्यत्वेन व्यद्योतिष्ट। परन्तु यदुयमयोः द्वितीयान्तविशेषणपदानां साम्यात् उपमालङ्कारः ध्वनिपदवीं समासददिति कारणात् श्लोकेनानेन शब्दशक्तिमूलोपमालङ्कारध्वनिः अभारि।

ततः अस्मिन्नेव प्रथमसर्गे गीर्वाणगणकृतभगवत्स्तुतिप्रकरणे पद्यमिदं विद्योतते –

त्रिवेदीमध्यदीप्ताय त्रिधाम्ने पञ्चहेतये।
वरदाय नमस्तुभ्यं बाह्यान्तरहविर्भुजे।।[6]

**तस्यार्थः**

सुमनसगणः क्षीराब्धिशायिनं भगवन्तं उक्तगुणोपेतं तुष्टाव। तथा हि – त्रिवेदीमध्यदीप्ताय – त्रयाणां वेदानां समाहारः त्रिवेदी ऋक्-यजुः-साम इति, तेषु त्रिषु वेदेषु नायकत्वेन देदीप्यमान इति कारणात् त्रिवेदीमध्यदीप्तः, तस्मै त्रिवेदीमध्यदीप्ताय इति । ततः त्रिधाम्ने – धाम इत्यस्य वासस्थानमित्यर्थः, त्रीणि धामानि यस्य सः त्रिधामा तस्मै इति विग्रहः, दुग्धाब्धि-रविमण्डल-परमपदरूपाणि स्थानानि तस्य सन्तीति कारणात् सः त्रिधामा, तस्मै त्रिधाम्ने इति। ततः पञ्चहेतये – हेतिः इत्यस्य आयुधः इत्यर्थः, पञ्चहेतयः यस्य सः पञ्चहेतिः तस्मै पञ्चहेतये इति, शङ्कचक्रगदाखड्गशाङ्गर्गरूपाण्यायुधानि यस्य तस्मै इत्यर्थः। ततः वरदाय – वरान् ददाति इति वरद इति आपाततोऽर्थः। परन्तु वरमित्यस्य उत्कृष्टमित्यर्थः भवति, अतः न केवलं सः भक्ताभीष्टफलप्रदः अपि तु अलौकिकत्वेन प्राप्यमानमोक्षफलप्रदोऽपि स एवेति मत्वा तस्य उपयोगः कृतः इत्यर्थः स्फुरति। ततः बाह्यान्तरहविर्भुजे –बाह्यञ्च आन्तरञ्चबाह्यान्तरे तयोः हविषी भुनक्तीति(येन भुज्यते) बाह्यान्तरहविर्भुक्, तस्मै बाह्यान्तरहविर्भुजे इति विग्रहः, बाह्यं हविः – चरुपुरोडाशादिकम्, आन्तरं हविः – प्रपदनाख्ये यजने होमद्रव्यं जीवरूपं हविः चेत्युभयं सैव भुङ्क्ते इति कारणात् बाह्यान्तरहविर्भुक् परमात्मा तस्मै नमः इति श्लोकार्थः।

परन्तु त्रिधामा केशवेऽनले इति वैजयन्तीकोषानुसारेण त्रिधाम पदस्य अग्निपरतयाप्यर्थं गदितुं शक्यत इति कारणादस्य श्लोकस्यपुनरालोकनं सञ्जायते। परन्तु यानि इतरविशेषणपदानि समुपयुक्तानि भगवत्परतया तानि सर्वाणि अनलभगवतोर्मध्ये वैलक्षण्यं द्योतयन्ति। तथा हि – अनलस्य त्रिधामा इत्यत्र प्रमाणानि – भूमौ अग्निरूपेण, आकाशे – सूर्यरूपेण, मेघे – विद्युद्रूपेण इति



PURVA MIMAANSA

तस्य त्रिधामत्वं, ततः एकस्य मनुष्यस्य शरीरे काम-क्रोध-जठररूपेण इत्यनेनास्य स्थानत्रयत्वं, ततः गार्हपत्य-आहवनीय-दाक्षिणमिति तस्य त्रिप्राकारत्वं, ततः तस्य पावक-पवमान-शुचिरिति पुत्रत्रयप्रतिपादनेन अवस्थात्रैविध्यमिति, अतः त्रिधामा अग्निः इति। ततः अग्निः पशुसोमयोः उत्तरस्यामुत्तरवेद्याः मध्ये दीप्यते, परन्तु श्रीमन्नारायणः त्रिवेदीमध्यदीप्त इति कारणात् उभयोः वैलक्षण्यं, ततः वह्निः सप्तहेतियुक्त इत्यत्र मुण्डकोपनिषद्वाक्यं प्रमाणं –काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुचा च देवी।। लेलायमानेति सप्तजिह्वाः।।[7]इति सप्तज्वालकश्रुतेः उभयोः वैपरीत्यं प्रतीयते। ततः श्रियमिच्छेद्धुताशनात् इत्यनेनअग्निः श्रीमात्रप्रदः, सो हि सर्वफलप्रद इति कारणात् उभयोः वैषम्यप्रतीतिः, ततः अग्निः केवलं बाह्याविर्भुक्, सोऽपि उभयं भुनक्तीति कारणात् उभयोः विलक्षणता। अतः त्रिधामा इत्यनेन साम्यतां प्रतिपाद्य इतरविशेषणपदैः व्यतिरेकत्वप्रतिपादनेन अत्र व्यतिरेकालङ्कारः ध्वन्यते।

एवं कवितार्किकसिंहः अर्थालङ्कारप्रस्तावेऽपि निष्णात एवेति निरूपयितुं पञ्चादशतमात् सर्गात् श्लोकमेकं प्रदर्शयामि -

गुणसिन्धुरसौ गुणातिवर्ती गतिरन्तस्थितिरागमैकगम्यः।
दयितासहितो दयैकसङ्गी गुरुराद्यो मयि गौरवं विधाता।।[8]

**तस्यार्थः**

पद्येऽस्मिन् विरोधाभासालङ्कारः दरीदृश्यते। तत्र नारदः श्रीकृष्णमुद्दिश्य इत्थं वर्णयाञ्चकार। असौ दरीदृश्यमानः श्रीकृष्णः गुणसिन्धुः अर्थात् सर्वेषां कल्याणगुणानाम् आकरः, परन्तु गुणातिवर्ती गुणानतीत्य वर्तते, अर्थात् निर्गुणमित्यर्थः कथं गुणाकरस्य निर्गुणत्वारोपः इति चेत्, तत्रस्थ गुणातिवर्तीति पदं न गुणाभावं द्योतयति अपि तु सत्व-रजस्-तमो रूपाणां मायागुणानाम् अतिक्रान्तार्थं द्योतयति। ततः गतिरन्तस्थितिरागमैकगम्यः –गति इत्यस्य चलनमर्थः (शरण्यं),अन्तस्थितिः इत्यस्य सर्वान्तर्यामीत्यर्थः , तथा च गतिस्थितिक्रियाद्वयरूपो यः, स एव आगमैकगम्यः – वेदप्रतिपादितभक्तिमार्गैकगम्य इति। दयितासहितः दयैकसङ्गी – दयिताः रुक्मिण्यादयः ताभिः सहितः, तथापि दयैकसङ्गी अर्थात् दयया करुणया सह प्राप्तसङ्गः भवति । गुरुराद्यो मयि गौरवं विधाता - यः आद्यो गुरुः अर्थात् सर्वेषामपि गुरुः, सः मयि नारदे, इदानीं गौरवं गुरोः भावं अर्थात् बहुमानतां विधत्ते।

ततः षष्ठसर्गे सप्तोत्तरशततमे श्लोके शब्दालङ्काररूपेण नन्दगोपमधिकृत्य इत्थं जगाद –

विराजमानादसमानभू-मा- विराजमानाद-समानभूमा।
वि-राजमानादसमानभूमा वि-राजमानादसमानभूमा ।[9]

**प्रथमपादस्यार्थः –विराजमानादसमान** - विराजमानादित्यस्य भ्राजमानादित्यर्थः, तत्रस्थ असमानपदं सम्बोधनपरं हे! असमान इति। तत्र अस-दीप्तौ इति धातोर्निष्पन्न अयं शब्दः प्रकाशवाचकः, अतः असमान इत्यस्य दीप्यमान इत्यर्थः। अथवा असमः अनः इति च्छेदे कृते, अन

इत्यस्य असुरित्यर्थे, असम इत्यस्य निरुपमार्थे, हे ! निरुपमजीवन इत्यर्थः प्रथमपादस्य।

**द्वितीयपादस्यार्थः –भू-मा-विराजमानाद-समानभूमा -** भूश्च मा च ताभ्यां विराजते इति भूमाविराजः श्रीभूमिसहितः हरिरित्यर्थः, तस्य मानात् ज्ञानात्, अर्थात् श्रीभूमिसहितोऽयं हरिः इति ज्ञानात्, असमानभूमा – निस्सीममहिमवान् इत्यर्थः। अथवा अन इत्यस्य बलमित्यर्थः, भूमा इत्यस्य प्रचय इत्यर्थः, अतः असमानभूमा इत्यस्य अविकलजीवनबाहुल्यवान् इत्यर्थः।

**तृतीयपादस्यार्थः - वि-राजमानादसमानभू मा –**विः इत्यस्यखग इत्यर्थः, अत्र खगेश्वरः गरुडः स्वीक्रियते, विना राजमानः इत्यस्य गरुडेन राजमानः हरि इत्यर्थः, तादृशं हरिम् अत्ति अनुभवतीति विराजमानात्, असमानभूमा – मानः इत्यस्य आग्रहः इत्ययर्थः तस्य भूः उत्पत्तिस्थानं, तया सहितः समानभूः, न समानभूः असमानभूः, मान् बुद्धिः यस्य सः असमानभूमा इत्यर्थः।

**चतुर्थपादस्यार्थः – वि-रा ज मानादस मानभूमा –**विः – पक्षी(शुकः), तस्य राः – शब्दः, तस्मात् जातः मानः-बहुमानः, तमवलम्ब्य वर्तते इति विराजमानात्, मानभूमा – मां लक्ष्मीम् आनयतीति मानः सम्पदुन्मेषकः, तथाभूतो भूमा यस्य सः मानभूमा, तथा सन् आस दीप्यस्व इत्यर्थः।

एतादृशमहाकाव्यलक्षणोपेतस्य ग्रन्थस्यास्य समाप्तिः आचार्यवर्या इत्थं समापयामासुः –

गुरुभिरनघचित्तैराहितोदारभूमा सुरभितरसमेतत् सूनृतं वेङ्कटेशः।
व्यतनुत यदुवीरप्रीतिमिच्छन् प्रभूतां कविकथकमृगेन्द्रः क्षेमदं काव्यरत्नम् ।।[10]

**तस्यार्थः**

असौ वेङ्कटेशः एतत् उत्कृष्टं काव्यरत्नं व्यतनुत इत्यन्वयः। काव्यान्तरेभ्यः अस्य काव्यस्य श्रैष्ठ्यं कथमिति चेत् – तदुच्यते प्रबन्धगौरवेण, नायकगौरवेण, शब्दार्थचमत्कारगौरवादिना अस्य काव्यस्योत्कर्षतां व्यञ्जयन्ति। एवं पद्ये कविकथकमृगेन्द्रः इत्यनेन कवेः विद्योत्कर्षलक्षणं द्योत्यते, अर्थात् वादजल्पादिरूपकथादिकम् आधारीकृत्य कथनेषु कवीषु मृगेन्द्र एषः प्रभूतां यदुवीरप्रीतिमिच्छन् अर्थात् काव्यस्यास्य निर्माणेन यदुवीरस्य श्रीकृष्णस्य प्रीतिपात्रगोचरत्वाख्यप्रयोजनत्वप्राप्तिः संसूच्यते। एवं स्वयं प्रकटितस्य स्वगौरवस्य गुर्वाधीनत्वं गुरुभिरनघचित्तैराहितोदारभूमा इत्यनेन प्रतिपाद्यते,एतादृशं सकलकाव्यलक्षणोपेतं काव्यं कर्तुं विनष्टसकलदोषान्तःकरणैः गुरुभिःप्राप्तमहमहिमोऽयं, तादृशमहिम्ना सुरभितरसमेतत् काव्यम्, अर्थात् शब्दार्थचमत्कारैः समुपेतं, सूनृतं श्रोतृप्रियं सत्यञ्चेतत् द्वयमाक्षिप्तं, क्षेमदं अभ्युदयनिःश्रेयरूपमङ्गलकरं काव्यरत्नं व्यतनुत इत्यर्थः।

**उपसंहारः**

एवं न केवलं काव्यकर्त्रास्य काव्यस्य रत्नत्वापत्तिः, अपि तु व्याख्याननेत्रा अप्पय्यदीक्षितेनापि अस्य काव्यस्य महिमा प्रकटीक्रियते। यतो हि सः काव्यस्यास्य व्याख्यानसमये

स्वयं स्ववाचा श्रीकृष्णस्य परतत्वप्रकटनं प्रादर्शि। तथा हि –

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ।
यत्रावतीर्णं कृष्णाख्यं पूर्णं ब्रह्म नराकृति ।।[11]

इत्यनेन शिवस्य परतत्वप्रकटयता स्ववाचा श्रीमन्नारायणस्य परतत्वनिगदनेन अस्य काव्यस्योत्कर्षतां अभाणि। एवं सः ग्रन्थकर्तुः वैशिष्ट्यमपि इत्थं जगाद –

इत्थं विचिन्त्याः सर्वत्र भावाः सन्ति पदे पदे।
कवितार्किकसिंहस्य काव्येषु ललितेष्वपि ।।[12]

एतादृशं वाचामगोचरगुणोपेतं, श्रीकृष्णस्य परतत्वप्रतिपादकं, महाकाव्यलक्षणजुष्टं, काव्यस्याङ्गत्वेन विद्यमानानां शब्दार्थालङ्कारादिततियुतं, केवलप्रतिभया ग्राह्यमानध्वन्यर्थभूयिष्ठं, सकलविद्वन्मनोहरं, स्वामिनिगमान्तमहादेशिकैः समनुगृहीतं क्षेमदमिदं काव्यरत्नं वयं सर्वैरनुभवितुं यतामहे ।।

## अन्त्यसूची


1. अग्निपुराणं (३३७. ६०७), संस्कृतनिबन्धशतकम् – पद्मश्री डा . कपिलदेव द्विवेदी आचार्यैः लिखितम्, डा. के.डि. द्विवेदी महोदयैः सङ्कलितम्, विश्वविद्यालय प्रकाशन – वाराणस्यां २००८ तमे वर्षे प्रकाशितम्, ISBN : 978-81-7124-644-1. पृष्ठसंख्या – 57.
2. कपिलाचार्यस्य वचनम् - संस्कृतनिबन्धशतकम् – पद्मश्री डा . कपिलदेव द्विवेदी आचार्यैः लिखितम्, डा. के.डि. द्विवेदी महोदयैः सङ्कलितम्, विश्वविद्यालय प्रकाशन – वाराणस्यां २००८ तमे वर्षे प्रकाशितम्, ISBN : 978-81-7124-644-1. पृष्ठसंख्या – 57.
3. काव्यप्रकाशः (१.४) – मम्मटभट्टविरचितः, भट्टवामनाचार्येण विरचित बालबोधिनी व्याख्या समन्वितः, परिमलसंस्कृतग्रन्थमालया प्रकाशितः, २०१९, पृष्ठसंख्या १५.
4. यादवाभ्युदयम् (१.२४) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या – 68.
5. अमरकोषः (१.३.१७८, १.३.१७९.) – अमरसिंहकविना विरचितः, with expanded commentary, Raghunath Talekar, 1896.
6. यादवाभ्युदयम् (१.४३) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या –74.

7. मुण्डकोपनिषत् (१.२.४) श्रीरङ्गरामानुजमुनिविरचितम् उपनिषद्भाष्यम्, श्रीमदभिनवदेशिक-वीरराघवार्यमहार्देशिकविरचित परिष्कार-उपनिषदर्थसंग्रहकारिका सहितम्, श्री उत्तमूर् वीरराघवाचार्य सेण्टिनरि ट्रस्ट्, चेन्नै, २००४, पृष्ठसंख्या ९२.
8. यादवाभ्युदयम् (११.३२) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या – 122.
9. यादवाभ्युदयम् (१३.४२) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या – 192.
10. यादवाभ्युदयम् (२४.७८) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या – 322.
11. यादवाभ्युदयम् (१.9 व्याख्या) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या – 56.
12. यादवाभ्युदयम् (१.१२ व्याख्या) – स्वामिनिगमान्तमहादेशिकैः संनुगृहीतम्, श्रीमदप्पय्यदीक्षितव्याख्यया सहितम्, श्रीरङ्गनगरे श्रीवाणीविलासमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, १९०८. पृष्ठसंख्या – 52.

PURVA MIMAANSA